# श्रीमद् भागवत रसिक कुटुंब

## श्रीदुर्गासप्तशती (षष्ठम अध्याय)

॥ श्रीदुर्गायै नमः ॥

॥ अथ श्रीदुर्गासप्तशती ॥

॥ ६. अथ षष्ठोऽध्यायः ॥

। ध्यानम् ।

ॐ नागाधीश्वरविष्टरां(म्) फणिफणोत्तं(म्)सोरु रत्नावली-
भास्वद्देहलतां(न्) दिवाकरनिभां(न्) नेत्रत्रयोद्भासिताम् ।
मालाकुम्भकपालनीरजकरां(ञ्) चन्द्रार्धचूडां(म्) परां(म्),
सर्वज्ञेश्वरभैरवाङ्कनिलयां(म्) पद्मावतीं(ञ्) चिन्तये ॥

ॐ ऋषिरुवाच ॥ 1॥

इत्याकर्ण्य वचो देव्याः(स्), स दूतोऽमर्षपूरितः ।
समाचष्ट समागम्य, दैत्यराजाय विस्तरात् ॥ 2॥

तस्य दूतस्य तद्वाक्य- माकर्ण्यासुरराट् ततः ।
सक्रोधः(फ्) प्राह दैत्याना- मधिपं(न्) धूम्रलोचनम् ॥ 3॥

हे धूम्रलोचनाशु त्वं(म्), स्वसैन्यपरिवारितः ।
तामानय बलाद् दुष्टां(ङ्), केशाकर्षणविह्वलाम् ॥ 4॥

तत्परित्राणदः(ख्) कश्चिद्- यदि वोत्तिष्ठतेऽपरः ।
स हन्तव्योऽमरो वापि, यक्षो गन्धर्व एव वा ॥ 5॥

ऋषिरुवाच ॥ 6॥

तेनाज्ञप्तस्ततः(श्) शीघ्रं(म्), स दैत्यो धूम्रलोचनः ।
वृतः(ष्) षष्ट्या सहस्राणा- मसुराणां(न्) द्रुतं(यँ) ययौ ॥ 7॥

स दृष्ट्वा तां(न्) ततो देवीं(न्), तुहिनाचलसं(म्)स्थिताम् ।
जगादोच्चैः(फ्) प्रयाहीति, मूलं(म्) शुम्भनिशुम्भयोः ॥ 8॥

न चेत्प्रीत्याद्य भवती, मद्भर्तारमुपैष्यति ।
ततो बलान्नयाम्येष, केशाकर्षणविह्वलाम् ॥ 9॥

देव्युवाच ॥ 10॥

दैत्येश्वरेण प्रहितो, बलवान् बलसं(वृँ)वृतः ।
बलान्नयसि मामेवं(न्), ततः(ख्) किं(न्) ते करोम्यहम् ॥ 11॥

ऋषिरुवाच ॥ 12॥

इत्युक्तः(स्) सोऽभ्यधावत्ता- मसुरो धूम्रलोचनः ।
हुङ्कारेणैव तं(म्) भस्म, सा चकाराम्बिका ततः ॥ 13॥

अथ क्रुद्धं(म्) महासैन्य- मसुराणां(न्) तथाम्बिका ।
ववर्ष सायकैस्तीक्ष्णैस्- तथा शक्तिपरश्वधैः ॥ 14॥

ततो धुतसटः(ख्) कोपात्- कृत्वा नादं(म्) सुभैरवम् ।
पपातासुरसेनायां(म्), सिं(म्)हो देव्याः(स्) स्ववाहनः ॥ 15॥

कां(म्)श्चित् करप्रहारेण, दैत्यानास्येन चापरान् ।
आक्राम्य चाधरेणान्यान्, स जघान महासुरान् ॥ 16॥

केषाञ्चित्पाटयामास, नखैः(ख्) कोष्ठानि केसरी ।
तथा तलप्रहारेण, शिरां(म्)सि कृतवान् पृथक् ॥ 17॥

विच्छिन्नबाहुशिरसः(ख्), कृतास्तेन तथापरे ।
पपौ च रुधिरं(ङ्) कोष्ठा- दन्येषां(न्) धुतकेसरः ॥ 18॥

क्षणेन तद्बलं(म्) सर्वं(ङ्), क्षयं(न्) नीतं(म्) महात्मना ।
तेन केसरिणा देव्या, वाहनेनातिकोपिना ॥ 19॥

श्रुत्वा तमसुरं(न्) देव्या, निहतं(न्) धूम्रलोचनम् ।
बलं(ञ्) च क्षयितं(ङ्) कृत्स्नं(न्), देवीकेसरिणा ततः ॥ 20॥

चुकोप दैत्याधिपतिः(श्), शुम्भः(फ्) प्रस्फुरिताधरः ।
आज्ञापयामास च तौ, चण्डमुण्डौ महासुरौ ॥ 21॥

हे चण्ड हे मुण्ड बलैर्- बहुभिः(फ्) परिवारितौ ।
तत्र गच्छत गत्वा च, सा समानीयतां(लँ) लघु ॥ 22॥

केशेष्वाकृष्य बद्ध्वा वा, यदि वः(स्) सं(म्)शयो युधि ।
तदाशेषायुधैः(स्) सर्वै- रसुरैर्विनिहन्यताम् ॥ 23॥

तस्यां(म्) हतायां(न्) दुष्टायां(म्), सिं(म्)हे च विनिपातिते ।
शीघ्रमागम्यतां(म्) बद्ध्वा, गृहीत्वा तामथाम्बिकाम् ॥ 24॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
शुम्भनिशुम्भसेनानीधूम्रलोचनवधो नाम षष्ठोऽध्यायः ॥

उवाच 4, श्लोकाः 20, एवम् 24, एवमादितः 412॥

